# Dhaumyaproktam Surya Ashtottarashata Nama Stotram

# ધૌમ્યપ્રોક્તં સૂર્યાષ્ટોત્તરશતનામસ્તોત્રમ્

## Document Information

Text title : Dhaumyaproktam Surya Ashtottarashata Nama Stotram 4

File name : dhaumyaproktaMsUryAShTottarashatanAmastotram.itx

Category : navagraha, mahAbhArata, aShTottarashatanAma, stotra

Location : doc_z_misc_navagraha

Proofread by : PSA Easwaran

Description/comments : mahAbhArata | araNyaparva | adhyAya 3/18-28||

Latest update : November 15, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 15, 2025

*sanskritdocuments.org*

# Dhaumyaproktam Surya Ashtottarashata Nama Stotram

## ધૌમ્યપ્રોક્તં સૂર્યાષ્ટોત્તરશતનામસ્તોત્રમ્

વૈશમ્પાયન ઉવાચ ।
શૃણુષ્વાવહિતો રાજઞ્શુચિર્ભૂત્વા સમાહિતઃ ।
ક્ષણં ચ કુરુ રાજેન્દ્ર સર્વં વક્ષ્યામ્યશેષતઃ ॥ ૧૬॥

ધૌમ્યેન તુ યથા પ્રોક્તં પાર્થાય સુમહાત્મને ।
નામ્નામષ્ટશતં પુણ્યં તચ્છૃણુષ્વ મહામતે ॥ ૧૭॥

ૐ સૂર્યોઽર્યમા ભગસ્ત્વષ્ટા પૂષાર્કઃ સવિતા રવિઃ ।
ગભસ્તિમાનજઃ કાલો મૃત્યુર્ધાતા પ્રભાકરઃ ॥ ૧૮॥

પૃથિવ્યાપશ્ચ તેજશ્ચ ખં વાયુશ્ચ પરાયણમ્ ।
સોમો બૃહસ્પતિઃ શુક્રો બુધોઽઙ્ગારક એવ ચ ॥ ૧૯॥

ઇન્દ્રો વિવસ્વાન્દીપ્તાંશુઃ શુચિઃ શૌરિઃ શનૈશ્ચરઃ ।
બ્રહ્મા વિષ્ણુશ્ચ રુદ્રશ્ચ સ્કન્દો વૈશ્રવણો યમઃ ॥ ૨૦॥

વૈદ્યુતો જાઠરશ્ચાગ્નિરૈન્ધનસ્તેજસાં પતિઃ ।
ધર્મધ્વજો વેદકર્તા વેદાઙ્ગો વેદવાહનઃ ॥ ૨૧॥

કૃતં ત્રેતા દ્વાપરશ્ચ કલિઃ સર્વામરાશ્રયઃ ।
કલા કાષ્ઠા મુહૂર્તાશ્ચ પક્ષા માસા ઋતુસ્તથા ॥ ૨૨॥

સંવત્સરકરોઽશ્વત્થઃ કાલચક્રો વિભાવસુઃ ।
પુરુષઃ શાશ્વતો યોગી વ્યક્તાવ્યક્તઃ સનાતનઃ ॥ ૨૩॥

લોકાધ્યક્ષઃ પ્રજાધ્યક્ષો વિશ્વકર્મા તમોનુદઃ ।
વરુણઃ સાગરોંઽશુશ્ચ જીમૂતો જીવનોઽરિહા ॥ ૨૪॥

ભૂતાશ્રયો ભૂતપતિઃ સર્વભૂતનિષેવિતઃ ।
મણિઃ સુવર્ણો ભૂતાદિઃ કામદઃ સર્વતોમુખઃ ॥ ૨૫॥

જયો વિશાલો વરદઃ શીઘ્રગઃ પ્રાણધારણઃ ।

ધન્વન્તરિર્ધૂમકેતુરાદિદેવોઽદિતેઃ સુતઃ ॥ ૨૬॥

દ્વાદશાત્મારવિન્દાક્ષઃ પિતા માતા પિતામહઃ ।
સ્વર્ગદ્વારં પ્રજાદ્વારં મોક્ષદ્વારં ત્રિવિષ્ટપમ્ ॥ ૨૭॥

દેહકર્તા પ્રશાન્તાત્મા વિશ્વાત્મા વિશ્વતોમુખઃ ।
ચરાચરાત્મા સૂક્ષ્માત્મા મૈત્રેણ વપુષાન્વિતઃ ॥ ૨૮॥

એતદ્વૈ કીર્તનીયસ્ય સૂર્યસ્યૈવ મહાત્મનઃ ।
નામ્નામષ્ટશતં પુણ્યં શક્રેણોક્તં મહાત્મના ॥ ૨૯॥

ઇતિ મહાભારતે આરણ્યપર્વણિ ૩ અધ્યાયાન્તર્ગતં
ધૌમ્યપ્રોક્તં સૂર્યાષ્ટોત્તરશતનામસ્તોત્રં સમ્પૂર્ણમ્ ।

મહાભારત । અરણ્યપર્વ । અધ્યાય ૩/૧૮-૨૮॥

mahAbhArata . araNyaparva . adhyAya 3/18-28..

Proofread by PSA Easwaran

---

*Dhaumyaproktam Surya Ashtottarashata Nama Stotram*

pdf was typeset on November 15, 2025

Please send corrections to *sanskrit@cheerful.com*